## कर्मवत् कर्मणा तुल्यक्रियः। (८७/२७६६)

कर्मणि क्रिया कर्म, कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवति (म.भा. २.६६)। [1]यस्मिन् कर्मणि कर्तृभूतेऽपि तद्वत् क्रिया लक्ष्यते [2]यथा [3]कर्मणि, स कर्ता कर्मवद् भवति। कर्माश्रयाणि कार्याणि [4]प्रतिपद्यते। 'कर्तरि शप्' (३.१.६८/२१६७) [5]इति कर्तृग्रहण[6]मिहानुवृत्तं प्रथमया विपरिणम्यते। यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनम्। भिद्यते [7]काष्ठं स्वयमेव। अभेदि [8]काष्ठं स्वयमेव। [9]कारिष्यते कटः स्वयमेव। वत्करणं स्वाश्रयमपि यथा स्यात्, भिद्यते कुसूलेन इति। अकर्मकाणां भावे लः सिद्धो भवति (म. भा. २. ६६)। 'लिङ्याशिष्यङ' (३. १. ८६/३४३४) इति द्विलकारको निर्देशः। तत्र लानुवृत्तेर्लन्तस्य कर्ता कर्मवद् भवति इति कुसूलाद् द्वितीया न भवति। कर्मणा इति किम्? करणाधिकरणाभ्यां तुल्यक्रियस्य मा भूत्। साध्वसिश्छिनत्ति। साधु स्थाली पचति। धात्वधिकारात् समाने धातौ कर्मवद्भावः (म.भा. २.६६)। इह न भवति, पचत्योदनं देवदत्तः, राध्यत्योदनं स्वयमेव इति। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति, न कर्तृस्थभावकानां न वा कर्तृस्थक्रियाणाम्।

कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया।
मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया॥

## तपस्तपःकर्मकस्यैव। (८८/२७७१)

'तप सन्तापे' (धा. पा. ९८६), अस्य कर्ता कर्मवद्भवति, स च तपःकर्मकस्यैव नान्यकर्मकस्य। क्रियाभेदाद् विध्यर्थमेतत्। उपवासादीनि तपांसि तापसं [10]तपन्ति। दुःखयन्ति इत्यर्थः। स तापसस्त्वगस्थिभूतः [11]स्वर्गाय तपस्तप्यते। अर्जयति इत्यर्थः[12]। पूर्वेणाप्राप्तः कर्मवद्भावो विधीयते। तप्यते तपस्तापसः। अतप्त तपस्तापसः। तपःकर्मकस्यैव[13] इति किम्? उत्तपति सुवर्णं सुवर्णकारः॥

## न दुहस्नुनमां यक्चिणौ। (८९/२७६७)

दुह स्नु नम् इत्येतेषां कर्मकर्तरि यक्चिणौ[14] [15]कर्मवद्भावोपदिष्टौ न भवतः। दुहेरनेन यक् प्रतिषिध्यते। चिण् तु 'दुहश्च' (३.१.६३/२७६९) इति पूर्वमेव विभाषितः। [16]दुग्धे गौः स्वयमेव। अदुग्ध गौः स्वयमेव। अदोहि गौः स्वयमेव। प्रस्नुते गौः स्वयमेव। [17]प्रास्नोष्ट गौः स्वयमेव। नमते दण्डः स्वयमेव। अनंस्त दण्डः स्वयमेव।

[२१०] यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसङ्ख्यानम्। (म. भा. २.७०)

कारयति कटं देवदत्तः। कारयते कटः स्वयमेव। अचीकरत् कटं देवदत्तः। अचीकरत कटः स्वयमेव। उत्पुच्छयते गां गोपः। उत्पुच्छयते गौः स्वयमेव। उदपुपुच्छत गौः स्वयमेव। [18]श्रथ्नाति [19]ग्रन्थं देवदत्तः। श्रथ्नीते [20]ग्रन्थः स्वयमेव। [21]अश्रन्थिष्ट [22]ग्रन्थः स्वयमेव। ग्रथ्नाति श्लोकं देवदत्तः। ग्रथ्नीते

---

1. यस्मात् फ. 2. तथा फ. 3. कर्मवत् क्रिया लक्ष्यते फ. 4. प्रपद्यते अ. ब. क. 5. इत्यतः फ 6. अनुवर्तते फ, तत् ब. 7–8. कोष्ठः ड. 9. अकारि फ. 10. तापयन्ति क. 11. स्वर्गार्थम् इ.ह. 12. न॰ दुःखयति इत्यधिकम् फ. 13. एव नास्ति क. फ. 14. प्रत्ययौ इत्यधिकम् ह. 15. कर्मवद्भावादुपदिष्टौ अ. क. 16. दुग्धा ह. 17. प्रस्नोष्ट फ. ह. 18. श्नन्थते ड. 19. मेखलाम् न्या. प. मं. 20. मेखला न्या. प. मं. 21. अश्रन्थीत् ह. 22. मेखला न्या. प. मं.